# UP TGT

# Previous Year Paper

## Sanskrit 2021

Booklet Series **C**

**Code : TG-03**

परीक्षा केन्द्र की मुहर लगायें
Affix stamp of examination centre

Question Booklet No.
प्रश्न पुस्तिका संख्या
1081391

# संस्कृत
# SANSKRIT

अनुक्रमांक (अंकों में)
Roll No. (in figures) [ ] (केवल अंग्रेजी में/Only in English)

OMR क्रम संख्या (अंकों में)
OMR Serial No. (in figures) [ ] (केवल अंग्रेजी में/Only in English)

OMR क्रम संख्या (शब्दों में)
OMR Serial No. (in words) ..............................

केन्द्र का नाम/Name of the Centre ..............................

समय : 2 घंटे — Time : 2 Hours

पूर्णांक : 500 — M.M. : 500

कक्ष-निरीक्षक का हस्ताक्षर/Signature of the Invigilator

## आवश्यक निर्देश

1. अभ्यर्थी अपना अनुक्रमांक केवल आवरण पृष्ठ तथा प्रश्न-पुस्तिका के साथ दिए गए OMR उत्तर-पत्रक के निर्दिष्ट स्थान पर लिखेंगे, अन्यत्र कहीं नहीं।
2. प्रश्न-पुस्तिका मिलने के उपरान्त अभ्यर्थी को तुरन्त जाँच कर सुनिश्चित कर लेना चाहिए कि पुस्तिका में पूरे पृष्ठ हैं तथा कोई प्रश्न छूट तो नहीं गया है। यदि कोई विसंगति है, तो प्रश्न-पुस्तिका मिलने के 10 मिनट के भीतर ही कक्ष-निरीक्षक को सूचित करना चाहिए तथा त्रुटिरहित दूसरी पुस्तिका प्राप्त कर लेनी चाहिए।

## IMPORTANT INSTRUCTIONS

1. The candidate will write his/her Roll No. only at the place provided for i.e. on the cover page and on OMR answer sheet given and nowhere else.
2. Immediately on the receipt of the question booklet, the candidate will check up and ensure that it contains all the pages and that no question is missing. If there is any discrepancy, it should be reported by the candidate to the invigilator within 10 minutes of issue of this question booklet and a fresh booklet without any discrepancy be obtained.

# संस्कृत
# SANSKRIT

1. कविशब्दस्य तृतीयाविभक्तेः रूपं नास्ति
(A) कविना (B) कविभ्याम्
(C) कविभिः (D) कविभ्यः

2. क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् – अत्र स्थायीभूषणं किम् ?
(A) स्वर्णभूषणम्
(B) वाणीरूपभूषणम्
(C) धनरूपभूषणम्
(D) भौतिकसंसाधनम्

3. किरातार्जुनीये कस्य रसस्य प्रधानता ?
(A) शृंगाररसस्य
(B) हास्यरसस्य
(C) वीररसस्य
(D) अद्भुतरसस्य

4. ब्रह्मणा आत्माधीनं एकान्तगुणं योऽस्ति अपण्डितानाम्
(A) मौनावलम्बनम्
(B) वाचालागुणम्
(C) परिभ्रमणम्
(D) दुर्व्यसनम्

5. 'न खलु धीमतां कश्चिदविषयो नाम'; कस्येयमुक्तिः ?
(A) शारद्वतस्य (B) शार्ङ्गरवस्य
(C) प्रियम्वदायाः (D) गौतम्याः

6. क्रियासु युक्तैर्नृप ! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः श्लोकेऽस्मिन् "चारचक्षुषः" कोऽस्ति ?
(A) केसरीनन्दनः
(B) मेघः
(C) वनेचरः
(D) युधिष्ठिरः

7. सन्धिं करोतु – पितृ + नाम्
(A) पितृनाम्
(B) पितृणाम्
(C) पित्रानाम्
(D) पितॄणाम्

8. 'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु' इतीयं सूक्तिर्विद्यते
(A) मेघदूते
(B) उत्तररामचरिते
(C) अभिज्ञानशाकुन्तले
(D) नीतिशतके

9. यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ सूक्तिरियं कस्य ग्रन्थस्य ?
(A) किरातार्जुनीयस्य
(B) नीतिशतकस्य
(C) उत्तररामचरितस्य
(D) शिवराजविजयस्य

10. महीजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः।
इत्यत्र 'संयति' पदे किं रूपम् ?
(A) सप्तमीविभक्तिः, एकवचनम्
(B) प्रथमाविभक्तिः, एकवचनम्
(C) द्वितीयाविभक्तिः, द्विवचनम्
(D) सप्तमीविभक्तिः, बहुवचनम्

11. दा धातोः लटि प्रथमपुरुषस्य बहुवचने रूपमस्ति
(A) ददति
(B) ददासि
(C) दत्थः
(D) दत्थ

12. किरातार्जुनीयस्य प्रथम सर्गस्य अन्तिमं पद्यं केन छन्दसा निबद्धोऽस्ति ?
(A) वंशस्थ-छन्दसा
(B) उपजाति-छन्दसा
(C) आर्या-छन्दसा
(D) मालिनी-छन्दसा

13. 'अतिनिद्रम्' इत्यस्मिन् समासे अति अव्ययं कस्मिन् अर्थे प्रयुक्तमस्ति ?
(A) विभक्त्यर्थे
(B) शब्दप्रादुर्भावार्थे
(C) असम्प्रति-अर्थे
(D) यौगपद्य-अर्थे

14. ''आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि।।''
इतीयं सूक्तिर्विद्यते
(A) नीतिशतके
(B) अभिज्ञानशाकुन्तले
(C) उत्तररामचरिते
(D) मेघदूते

15. 'गम्' इति धातोर्लट्लकारे मध्यमपुरुषस्य द्विवचने रूपं भवति
(A) गच्छतः
(B) गच्छथ
(C) गच्छथः
(D) गच्छावः

16. 'हरेऽव' इत्यत्र सन्धिकारकं सूत्रमस्ति
(A) एङः पदान्तादति
(B) अवङ् स्फोटायनस्य
(C) वान्तो यि प्रत्यये
(D) एचोऽयवायावः

17. 'पुटपाकप्रतीकाशो रामस्य करुणो रसः'
इतीयमुक्तिरस्ति उत्तररामचरिते
(A) मुरलायाः
(B) तमसायाः
(C) गोदावर्याः
(D) सीतायाः

18. 'मैं पात्र से जल पीता हूँ;' इत्यस्य वाक्यस्य संस्कृतेन कर्मवाच्ये किं रूपं भवति ?
(A) पात्रेणाहं जलं पिबामि।
(B) पात्रेणाहं जलं पीयते।
(C) मया पात्रेण जलं पीयते।
(D) मया पात्रं जलं पीयते।

19. लब्धापि का दुःखेन संरक्ष्यते ?
(A) विद्या
(B) शक्तिः
(C) स्मृतिः
(D) लक्ष्मीः

20. मृतयवनस्य कञ्चुकात् किं प्राप्तम् ?

(A) पत्रम्

(B) रत्नम्

(C) छुरिका

(D) मानचित्रम्

21. 'सन्तप्तानां त्वमसि शरणम् ' – अत्र सन्तप्तानां रक्षकः

(A) भोलेनाथः (B) कुबेरः

(C) मेघः (D) यक्षः

22. अर्थो हि कन्या परकीय एव – इत्यस्मिन् श्लोके छन्दः

(A) इन्द्रवज्रा

(B) उपजाति

(C) आर्याजाति

(D) वंशस्थ

23. मेघदूतस्य शैल्यां त्रयोदश-शताब्द्यां वेदान्तदेशिककृतरामकथाविषयकदूतकाव्यस्य नाम

(A) हनुमतदूतम्

(B) कपिदूतम्

(C) हंससन्देशम्

(D) भ्रमरदूतम्

24. समासं करोतु – कृष्णं श्रितः

(A) कृष्णाश्रितः

(B) कृष्णश्रितः

(C) कृष्णेश्रितः

(D) कृष्णीश्रितः

25. 'अपरिणामोपशमो दारुणो लक्ष्मीमदः' इतीयं सूक्तिर्विद्यते

(A) अभिज्ञानशाकुन्तले

(B) उत्तररामचरिते

(C) कादम्बर्यां शुकनासोपदेशे

(D) नलचम्पूकाव्ये

26. उत्तमजनाः किं न परित्यजन्ति ?

(भर्तृहरिमतानुसारम्)

(A) अध्ययनम्

(B) धनार्जनम्

(C) प्रारब्धं कार्यम्

(D) देवार्चनम्

27. 'अस्मद्' शब्दस्य 'नौ' इत्येतद् रूपं कुत्र भवति ?

(A) द्वितीयाविभक्तौ द्विवचने, बहुवचने च

(B) चतुर्थीविभक्तौ द्विवचने, बहुवचने च

(C) द्वितीयाचतुर्थीषष्ठीविभक्तिषु द्विवचने

(D) षष्ठीविभक्तौ बहुवचने

28. पठ्धातोः लोटि प्रथमपुरुषैकवचनस्य रूपमस्ति

(A) पठेत् (B) पठतात्

(C) अपठत् (D) पठति

29. 'वनेचरः' इत्यत्र कः समासः ?

(A) अव्ययीभावः

(B) अलुक्

(C) तत्पुरुषः

(D) कर्मधारयः

30. अभिज्ञानशाकुन्तलस्य नायकः कीदृशः ?
(A) धीरललितः
(B) धीरोदात्तः
(C) धीरोद्धतः
(D) धीरप्रशान्तः

31. 'विवेकभ्रष्टानां भवति विनिपातः शतमुखः' इतीयं सूक्तिर्विद्यते
(A) किरातार्जुनीये
(B) नीतिशतके
(C) मेघदूते
(D) कादम्बर्यां शुकनासोपदेशे

32. "अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते।।"
इतीयमुक्तिरस्ति
(A) मुरलायाः
(B) तमसायाः
(C) सीतायाः
(D) लोपामुद्रायाः

33. श्रियः प्रदुग्धे विपदो रुणद्धि
यशांसि सूते मलिनं प्रमार्ष्टि।
संस्कारशौचेन परं पुनीते
शुद्धा हि बुद्धिः किल कामधेनुः।।
अस्मिन् श्लोके कर्तृपदं किम् ?
(A) श्रियः
(B) यशांसि
(C) शुद्धा बुद्धिः
(D) कामधेनुः

34. उत्तररामचरितस्य तृतीयाङ्कस्याऽऽरम्भः केन वाक्येन भवति ?
(A) ततः प्रविशति कन्याद्वयम्
(B) ततः प्रविशति मुनिद्वयम्
(C) ततः प्रविशति नदीद्वयम्
(D) ततः प्रविशति सखीद्वयम्

35. ब्रू धातोः लटि प्रथमपुरुषस्य रूपं <u>नास्ति</u>
(A) ब्रवीति
(B) आह
(C) आहुः
(D) आत्थ

36. 79 इत्यस्याः संख्यायाः कृते कः शब्दः प्रयुज्यते ?
(A) नवसप्तति
(B) नवाशीति
(C) नवनवति
(D) एकान्नसप्तति

37. अहंकारदाहज्वरमूर्च्छिता का भवति ?
(A) राजप्रकृतिः
(B) राजनीतिः
(C) राजमहिषी
(D) राजकन्या

38. यक्षः रामगिर्याश्रमेषु किं चक्रे ?
(A) प्रणतिम्
(B) प्रीतिम्
(C) वसतिम्
(D) प्रतीतिम्

39. 'शाकपार्थिवः' इति पदे समासोऽस्ति

(A) मध्यमपदलोपी तत्पुरुषः

(B) मयूरव्यंसकादितत्पुरुषः

(C) उपपदतत्पुरुषः

(D) अलुक्तत्पुरुषः

40. भू धातोः लट्–मध्यमपुरुष–द्विवचनस्य रूपमस्ति

(A) भवतम्

(B) भवेतम्

(C) अभवतम्

(D) भवथः

41. इयं सूक्तिः कुत्र प्राप्यते ?

'अर्थो हि कन्या परकीय एव'

(A) उत्तररामचरिते

(B) नीतिशतके

(C) शुकनासोपदेशे

(D) अभिज्ञानशाकुन्तले

42. शिवस्य राशीभूत इव अट्टहासः कः ?

(A) स्वर्गः

(B) विन्ध्यः

(C) कैलासः

(D) मेरुः

43. नदीः इति पदे का विभक्तिः ?

(A) द्वितीया

(B) तृतीया

(C) पञ्चमी

(D) षष्ठी

44. 'निन्दन्तु निपुणाः' इत्यत्र 'नीतिनिपुणाः' इति पदे समासोऽस्ति

(A) तत्पुरुषः

(B) कर्मधारयः

(C) बहुव्रीहिः

(D) द्विगुः

45. 'आद्ये वः कुसुमप्रसूतिसमये' इत्यत्र 'वः' इति पदे विभक्तिरस्ति

(A) प्रथमा

(B) द्वितीया

(C) तृतीया

(D) षष्ठी

46. 'निरत्ययं साम न दानवर्जितम्' इत्यस्मिन् श्लोकांशे 'निरत्ययम्' इति पदे समासोऽस्ति

(A) अव्ययीभावः

(B) तत्पुरुषः

(C) कर्मधारयः

(D) बहुव्रीहिः

47. 'अनुमतगमना शकुन्तला

तरुभिरियं वनवासबन्धुभिः।'

इत्यस्मिन् पद्यांशे 'अनुमतगमना' पदे कः समासः ?

(A) बहुव्रीहिः

(B) तत्पुरुषः

(C) अव्ययीभावः

(D) द्वन्द्वः

48. किरातार्जुनीये महाकाव्ये कियन्तः सर्गाः ?

(A) 21

(B) 19

(C) 18

(D) 22

49. उपमानपूर्वपदकर्मधारयस्य उदाहरणमस्ति

(A) घनश्यामः

(B) पुरुषव्याघ्रः

(C) कृष्णसर्पः

(D) चराचरम्

50. उत्तररामचरितस्य तृतीयाङ्कस्य नाम किम् ?

(A) सीता

(B) छाया

(C) माया

(D) प्रज्ञा

51. 'दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधन:' इति श्लोकांशस्य दुरोदरशब्दस्यार्थोऽस्ति

(A) लम्बोदर: (B) द्यूतकार:

(C) युधिष्ठिर: (D) द्यूतम्

52. भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गम: श्लोकोऽयं कुत्रास्ति ?

(A) अभिज्ञानशाकुन्तले 4/22

(B) अभिज्ञानशाकुन्तले 4/18

(C) अभिज्ञानशाकुन्तले 4/6

(D) अभिज्ञानशाकुन्तले 4/9

53. 'राजराज' इति शब्दस्य कोऽर्थ: ?

(A) इन्द्र: (B) कुबेर:

(C) शिव: (D) विष्णु:

54. 'कामकरिण: कदलिका' का ?

(A) लक्ष्मी: (B) तृष्णा

(C) माया (D) वासना

55. मनुष्याणां देहस्य: शत्रु: क: ? (नीतिशतकानुसारम् )

(A) निद्रा (B) आलस्यम्

(C) बुभुक्षा (D) पिपासा

56. 'भू' धातो: लङ् लकारस्य मध्यमपुरुषस्य बहुवचने रूपम भवति

(A) अभवत्

(B) अभवत

(C) अभवन्

(D) अभवम्

57. सुयोधनस्य क: परस्परं न बाधते ?

(A) त्रिगण:

(B) मित्रगण:

(C) शत्रुगण:

(D) भृत्यगण:

58. 'शिवराजविजय:' रचना अस्ति

(A) अम्बिकादत्तव्यासस्य

(B) पण्डितराजजगन्नाथस्य

(C) दण्डिन:

(D) बाणभट्टस्य

59. पञ्चगङ्गम् इति समस्त पदे क: समास: ?

(A) द्विगु समास:

(B) अव्ययीभाव:

(C) बहुव्रीहि समास:

(D) कर्मधारय:

60. 'इष्टप्रवासजनितान्यबलाजनस्य दु:खानि नूनमतिमात्रसुदु:सहानि।।' इतीयं सूक्तिर्विद्यते

(A) मेघदूते

(B) अभिज्ञानशाकुन्तले

(C) उत्तररामचरिते

(D) नीतिशतके

61. राष्ट्रभक्तिभावनापूर्णं गद्यकाव्यमस्ति

(A) कादम्बरी

(B) शिवराजविजयम्

(C) मालविकाग्निमित्रम्

(D) रघुनाथचरितम्

62. दुर्योधनः दण्डेन कं निहन्ति ?

(A) उपद्रवम्

(B) अर्थबाधाम्

(C) धर्मविप्लवम्

(D) दण्डपारुष्यम्

63. स्त्रीलिङ्गस्य किं शब्दस्य रूपं नास्ति ?

(A) कान्

(B) कया

(C) कयोः

(D) कासाम्

64. 'पा' धातोः विधिलिङ्लकारे मध्यमपुरुषैकवचने' किं रूपं भवति ?

(A) पेयात्

(B) पेयाः

(C) पिबेयम्

(D) पिबेः

65. न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः अस्य सुभाषितस्य रचनाकारः कः ?

(A) माघः

(B) भारविः

(C) श्रीहर्षः

(D) भासः

66. पतिशब्दः प्रथमा विभक्तौ, द्विवचने

(A) पतिः

(B) पत्या

(C) पत्ये

(D) पती

67. अधोलिखिता सूक्तिः कुत्र विद्यते ?
'हितं मनोहारि च दुर्लभं वचः।'

(A) मेघदूते

(B) शुकनासोपदेशे

(C) उत्तररामचरिते

(D) किरातार्जुनीये

68. पा (पिब्) धातोः लङ् – प्रथमपुरुषैकवचन रूपमस्ति

(A) पिबति

(B) अपिबत्

(C) पिबेत्

(D) पास्यति

69. सुयोधनः जगतीं केन जेतुं समीहते ?

(A) युद्धेन

(B) छलेन

(C) नयेन

(D) विनयेन

70. 'पारेगङ्गम्' इत्यत्र समासोऽस्ति

(A) अव्ययीभावः

(B) तत्पुरुषः

(C) बहुव्रीहिः

(D) द्विगुः

71. "किम्" प्रश्नवाचकसर्वनामपदं चतुर्थी विभक्तौ, एकवचने

(A) कस्मात्

(B) कस्य

(C) कस्मै

(D) केन

72. किरातार्जुनीयस्य कथावस्तुनः मूलस्रोतः किम् ?

(A) महाभारतम्

(B) रामायणम्

(C) वायुपुराणम्

(D) अग्निपुराणम्

73. कर्मसंज्ञाविधायकं सूत्रं नास्ति

(A) अभिनिविशश्च

(B) तथायुक्तं चानीप्सितम्

(C) अकथितञ्च

(D) सहयुक्तेऽप्रधानम्

74. मेघदूतं केन छन्दसा निबद्धमस्ति ?

(A) मन्दाक्रान्ता

(B) उपजातिः

(C) मालिनी

(D) प्रहर्षिणी

75. सन्धिं करोतु – स्व + ईरिणी

(A) स्वेरिणी

(B) स्वैरिणी

(C) स्वीरिणी

(D) स्वारिणी

76. 'विग्रहवत्यपि अप्रत्यक्षदर्शना' का ?

(A) तृष्णा

(B) लक्ष्मीः

(C) इन्द्रियरागः

(D) लोलुपता

77. 'सर्व' इति शब्दस्य स्त्रीलिङ्गे चतुर्थी विभक्तौ एकवचने रूपं भविष्यति

(A) सर्वस्मै (B) सर्वायाः

(C) सर्वस्यै (D) सर्वाय

78. धनुस्य महत्तां कस्मिन् वाक्येऽकथयत् ?

(A) सर्वे गुणाः काञ्चनमाश्रयन्ति

(B) अर्थो हि कन्या परकीय एव

(C) विवेकभ्रष्टानां भवति विनिपातः शतमुखः

(D) न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्

79. 'अहो दुरन्ता बलवद्विरोधिता' इतीयमुक्तिरस्ति

(A) वनेचरस्य (B) युधिष्ठिरस्य

(C) द्रौपद्याः (D) भीमसेनस्य

80. 'राजपुरुषः' इति उदाहरणमस्ति

(A) द्वन्द्वस्य

(B) बहुव्रीहेः

(C) समानाधिकरणतत्पुरुषस्य

(D) व्यधिकरणतत्पुरुषस्य

81. "कोऽन्यो हुतवहाद् दग्धुं प्रभवति ?" इति का कथयति ?

(A) अनसूया (B) शकुन्तला

(C) प्रियंवदा (D) गौतमी

82. लक्ष्मीं प्रति किमकथयत् ?

(A) सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति

(B) वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह

(C) संतप्तानां त्वमसि शरणम्

(D) जातं वंशे भुवनविदिते

83. पञ्चत्रिंशदधिकद्विशतम् बोधयति

(A) 253

(B) 235

(C) 532

(D) 335

84. 'हरये' इत्यत्र सन्धिप्रयोजकं सूत्रमस्ति

(A) इको यणचि

(B) एचोऽयवायाव:

(C) लोप: शाकल्यस्य

(D) एङ: पदान्तादति

85. 'कुलटा' इत्यत्र केन नियमेन सन्धिर्जात: ?

(A) अक: सवर्णे दीर्घ:

(B) आद् गुण:

(C) शकन्ध्वादिषु पररूपं वाच्यम्

(D) एङ: पदान्तादति

86. भी धातो: विधिलिङि प्रथमपुरुषैकवचनस्य रूपमस्ति

(A) बिभेत्

(B) बिभियात्

(C) बिभ्यतु

(D) बिभित

87. 'आ: अतिथिपरिभाविनि' – अस्य कथनस्य कथनकार:

(A) महर्षि विश्वामित्र:

(B) महर्षि मारीच:

(C) महर्षि कण्व:

(D) महर्षि दुर्वासा

88. शुकनासो यमुपदिष्टवान्, स उपदेशानन्तरं कुत्र जगाम ?

(A) मातुरन्तिकम् (B) पितुरन्तिकम्

(C) स्वभवनम् (D) स्वोपवनम्

89. क: 'पय:पूरपूरितान्यकूपारतलानि' मरुकरोति ?

(A) योगिराज:

(B) भगवान् काल:

(C) शिववीर:

(D) महमूद गजनी

90. अच्प्रत्याहारेण न बोधितो भवति

(A) च् (B) अ

(C) ऋ (D) ए

91. नीतिशतकानुसारं, मूर्खाणाम् आभूषणं किम् ?

(A) हार:

(B) वाचालत्वम्

(C) मौनम्

(D) करस्थं पुस्तकम्

92. कोऽस्ति प्रधानो रस: शिवराजविजयस्य ?

(A) करुण: (B) वीर:

(C) शृङ्गार: (D) रौद्र:

93. 'येषां न विद्या न तपो न दानं .... मनुष्यरूपेण मृगाश्चरन्ति' ।। – अस्मिन् श्लोके 'मृगा:' इति पदस्यार्थोऽस्ति

(A) हरिणा: (B) पशव:

(C) गर्दभा: (D) वृषभा:

94. 'प्रत्यर्पितन्यास इवान्तरात्मा' इत्यस्मिन् पद्यांशे कोऽलङ्कारः ?

(A) उपमा (B) रूपकम्

(C) उत्प्रेक्षा (D) दीपकम्

95. किरातार्जुनीयमिति महाकाव्यस्य स्रोतं किम् ?

(A) भागवतपुराणम् (B) शिवपुराणम्

(C) दशरथजातकम् (D) हितोपदेशम्

96. 'पतिः' इति शब्दस्य तृतीया विभक्तौ एकवचने रूपमस्ति

(A) पत्या (B) पतिना

(C) पत्येन (D) पतीना

97. मेघदूते 'सृष्टिराद्येव धातुः' इति का कथिता ?

(A) अलकापुरी (B) रेवा नदी

(C) उज्जयिनी (D) यक्षप्रिया

98. 'हेतौ' इति सूत्रस्योदाहरणमस्ति

(A) पुण्येन दृष्टो हरिः

(B) जटाभिस्तापसः

(C) कृष्णाय ईक्षते

(D) चौराद् विभेति

99. 'अन्तर्हिते शशिनि सैव कुमुद्वती में दृष्टिं न नन्दयति संस्मरणीयशोभा'।
इत्यत्र 'अन्तर्हिते शशिनि' इत्यनयोः पदयोः केन सूत्रेण सप्तमीविभक्तिर्भवति ?

(A) यतश्च निर्धारणम्

(B) यस्य च भावेन भावलक्षणम्

(C) निमित्तात् कर्मयोगे

(D) सप्तमीपञ्चम्यौ कारकमध्ये

100. अलुकृतत्पुरुषस्य उदाहरणमस्ति

(A) परस्मैपदम् (B) अलंकृत्य

(C) सत्कृत्य (D) ऊरीकृत्य

101. अधोलिखितायाः सूक्तेः स्रोतः किम् ?
'आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्।'

(A) नीतिशतकम्

(B) शिवराजविजयः

(C) मेघदूतम्

(D) किरातार्जुनीयम्

102. सख्युः पदे विभक्तिः वचनं च

(A) पञ्चमी, एकवचनम्

(B) पञ्चमी, द्विवचनम्

(C) चतुर्थी, एकवचनम्

(D) चतुर्थी, बहुवचनम्

103. 'दा' धातोः लङ्लकारस्य प्रथमपुरुषस्य बहुवचने किं रूपं भवति ?

(A) अददाम् (B) अददुः

(C) दद्युः (D) अदुः

104. पितृशब्दस्य रूपं नास्ति

(A) पितृणा (B) पित्रे

(C) पितुः (D) पित्रोः

105. शिवराजविजयो यथा मङ्गलसूक्त्या आरम्भ्यते सा कुतः समुद्धृता ?

(A) विष्णुपुराणात्

(B) श्रीमद्भगवद्गीतायाः

(C) श्रीदुर्गासप्तशत्याः

(D) भागवतमहापुराणात्

106. 'न विव्यथे तस्य मनो न हि प्रियं, प्रवक्तुमिच्छन्ति मृषा हितैषिण:।' इति श्लोकांशस्य 'हितैषिण:' इति पदे विभक्तिवचने स्त:

(A) प्रथमा, बहुवचनम्

(B) द्वितीया, बहुवचनम्

(C) पञ्चमी, एकवचनम्

(D) षष्ठी, एकवचनम्

107. 'परभृतविरुतं कलं यथा' इत्यत्र 'परभृत' शब्दस्य कोऽर्थ: ?

(A) चातक:
(B) काक:
(C) हंस:
(D) कोकिल:

108. भूतबलि: समस्त पदे य: समास:

(A) तृतीया तत्पुरुष:

(B) द्वितीया तत्पुरुष:

(C) पञ्चमी तत्पुरुष:

(D) चतुर्थी तत्पुरुष:

109. वारिशब्दस्य सप्तमी विभक्ते: रूपं नास्ति

(A) वारिणि
(B) वारिणो:
(C) वारिषु
(D) वारिसु

110. 'याच्त्रा मोघा वरमधिगुणे नाधमेलब्धकामा' इत्यस्मिन् श्लोकांशे 'अधिगुणे' इति पदे समासोऽस्ति

(A) अव्ययीभाव:

(B) बहुव्रीहि:

(C) तत्पुरुष:

(D) कर्मधारय:

111. संख्याया: कृते संस्कृते क: शब्द: प्रयुज्यते ?

(A) ऊननवति

(B) नवाशीति

(C) षण्णवति

(D) नवनवति

112. यस्मिन् श्लोके वस्तुनिर्देशात्मकं मंगलाचरणमस्ति

(A) श्रिय: कुरुणामधिपस्य पालनीं प्रजासु

(B) या सृष्टि: स्रष्टुराद्या वहति विधिहुतं

(C) दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये

(D) तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्त:

113. महाकविबाणभट्टकृतकादम्बर्यन्तर्गत: ग्रन्थ:

(A) वासवदत्ता

(B) शुकनासोपदेश:

(C) ऋग्वेदभाष्यभूमिका

(D) वेदान्तसार:

114. 'विचिन्तयन्ती यमनन्यमानसा' इत्यत्र 'अनन्यमानसा' पदे समासोऽस्ति

(A) तत्पुरुष:

(B) कर्मधारय:

(C) बहुव्रीहि:

(D) अव्ययीभाव:

115. गुणसन्धेरुदाहरणमस्ति

(A) अक्षौहिणी
(B) स्वैरिणी
(C) प्रौढ:
(D) उपेन्द्र:

O

116. करणसंज्ञा भवति

(A) कर्तुरीप्सिततमस्य
(B) साधकतमस्य
(C) क्रियया अभिप्रेतस्य
(D) अधिकरणस्य

117. मूलश्लोकस्य उचितं शब्दं (पदं) रिक्तस्थाने प्रपूरयतु – 'रिक्त: सर्वो भवति हि ________ पूर्णता गौरवाय ।।'

(A) विभुः
(B) लघुः
(C) प्रभुः
(D) शिशुः

118. अपादानसंज्ञाया: विधानं न करोति सूत्रम्

(A) ध्रुवमपायेऽपादानम्
(B) स्पृहेरीप्सित:
(C) भुव:प्रभवश्च
(D) वारणार्थानामीप्सित:

119. "द्वावेव" पदस्य सन्धि विच्छेदं कुरु

(A) द्वा + एव
(B) द्वे + एव
(C) द्वौ + एव
(D) द्वि + एव

120. किरातार्जुनीयस्य सुभाषितमस्ति

(A) कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु
(B) वरं विरोधोऽपि समं महात्मभि:
(C) याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा:
(D) तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि

121. संस्कृत व्याकरणे (पाणिनिमनुसृत्य) प्रत्याहाराणां संख्या कियती ?

(A) 54
(B) 45
(C) 43
(D) 39

122. प्रासादात् बालक: पततीति वाक्यं बहुवचने लिख

(A) प्रासादेन बालक: पतति
(B) प्रासादात् बालका: पतन्ति
(C) प्रासादात् बालक: पतन्ति
(D) प्रासादेन बालका: पतन्ति

123. शुकनासेन क उपदिष्ट: ?

(A) तारापीड:
(B) चन्द्रापीड:
(C) जाबालि:
(D) पुण्डरीक:

124. शुकनासोपदेशस्य वचनमत्र

(A) तृष्णा-विष-मूर्च्छिता: कनकमयमिव सर्वं पश्यन्ति
(B) हस्तेलीलाकमलमलके बालकुन्दानुविद्धम्
(C) बोद्धारो मत्सरग्रस्ता: प्रभव: स्मयदूषिता:
(D) हितं मनोहारि च दुर्लभं वच:

125. 'स च कुलपतिराद्यश्छन्दसां य: प्रयोक्ता' इत्यनेन संकेतितोऽस्ति

(A) वाल्मीकि:
(B) व्यास:
(C) अगस्त्य:
(D) वसिष्ठ: